# ISWK SHARING KNOWLEDGE

## Class - VIII

## Subject- Sanskrit 3rd Language

**पाठः - ईश्वरः यत्करोति शोभनं करोति ।**

।

By- Geethu praseed

©ISWK

# 6. ईश्वर: यत्करोति शोभनं करोति ।

**(विशेषण-विशेष्य पर आधारित कथा)**

एकदा द्वे मित्रे निखिल: गौरव: च नगरं प्रति गच्छत: स्म । निखिल: कृश: गौरव: च लम्ब: आसीत् । निखिल: अवदत्- गौरव,त्वं ईश्वरस्य परमो भक्तोऽसि । तस्य सर्वा: रचना: दोषरहिता: इति मन्यसे । परमहम् पश्यामि यदीश्वरस्य रचना सर्वथा त्रुटिपूर्णा वर्तते । इदं क्षेत्रं पश्य । अस्मिन् क्षेत्रे कालिन्दानां कूष्माण्डानां च लता: वर्तन्ते । एता: लता: क्षीणा: दुर्बला: च सन्ति । ईश्वर: स्थूलानि फलानि आसु लतासु उत्पादयति । स्थूलेषु वृक्षेषु स जम्बू-आदीनि फलानि उत्पादयति । आश्चर्यमिदम् ईश्वरस्य इयं रचना दोषयुक्ता अस्ति ।

दोषदर्शी स: निखिल: शिरसा खल्वाट: आसीत् । सूर्यातपेन पीडित: स: मित्रमवदत्– मित्र ! एष: हरित: विशाल: च वृक्ष: अस्ति । वृक्षस्य अध: विश्रामं कुर्याव ।



यावत् सः वृक्षस्य अधः अगच्छत् तावदेव खल्वाटस्य शिरसि एकम् आम्रफलम् अपतत् | सः पीडया उच्चैः अवदत् - हा ! शिरसि व्रजपातोऽभवत् | पुनः च तस्य मुखात् निःसृतम् – प्रभो ! तव रचना सर्वथा दोषरहीना अस्ति | यदि कदाचित् अस्मिन् वृक्षे कालिन्दानि भवेयुः तर्हि मम शिरः खण्डशः भवेत् | नूनम् अहं मूर्खः निर्बुद्धिः च अस्मि | सत्यमेव अस्ति यत् ईश्वरः यत्करोति शोभनं करोति |



तदा गौरवः अवदत् – सत्यमिदं यत् ईश्वरस्य रचना सर्वथा निर्दोषाऽस्ति , अज्ञानकारणात् वयं तस्य महत्वम् अवगन्तुम् असमर्थाः |

# शब्द-शक्ति: (Word Meanings)

*कृश: - दुर्बला thin,slim

*वर्तते – होता है happens

*कालिन्दम् – तरबूज़ watermelon

*कूष्माण्डम् – पेठा pumpkin

*स्थूल: - मोटा thick

*जम्बूफलानि-जामुन jambul,blackberry

*दोषदर्शी –दोष देखने वाला fault-seeker

*शिरसा – सिर से by head

*खल्वाट: -गंजा bald

*आतपेन – धूप से with sun

*अध:- नीचे down

*यावत् –जैसे ही / जब तक as soon as

*तावत् –वैसे ही /तब तक then

*व्रजपात –पत्थर गिरना falling of stone

*नि:सृतम् -निकला came out

*खण्डश: -टुकड़े - टुकड़े into pieces

*नूनम् –निश्चय ही definitely

*अवगन्तुम् –जानने के लिए for knowing

## नई धातुएँ (New Roots)

वृत् – होना to be

## संयोगयुक्त शब्द (Combined Words)

परमहम् – परम् +अहम्

सत्यमेव - सत्यम् + एव

आश्चर्यमिदम् - आश्चयर्यम् +इदम्

सत्यमिदम् - सत्यम् + इदम्

मित्रमवदत् - मित्रम् + अवदत्

## समस्त पद (compound Words)

दोषरहित: - दोषेभ्य: + रहित:

सूर्यातपेन - सूर्यस्य आतपेन

दोषयुक्ता:- दोषै: युक्ता

आम्रफलम् – आम्रस्य फलम्

## सन्धिच्छेद (Disjoining Words)

| | |
|---|---|
| भक्तोऽसि - भक्त: + असि | व्रजपातोऽभवत् - व्रजपात: + अभवत् |
| यदिश्वरस्य- यत् + ईश्वरस्य | निर्बुद्धि - निर् + बुद्धि: |
| सूर्यातपेन - सूर्य + आतपेन | निर्दोषाऽस्ति - निर्दोषा + अस्ति |

# अभ्यास

## सम्प्रति लेखनीयम्

**1.मञ्जूषाया: एकपदेन उत्तरत |** (मंजूषा से चुनकर एक पद में उत्तर दीजिए | Answer in one word using the words from the boxes.)

| |
|---|
| शोभनम् , नगरं प्रति , गौरव: , ईश्वरस्य , निखिलस्य , लतासु |

(क) ईश्वरस्य भक्त: क: आसीत् ? ........................
(ख) कालिन्दानि वृक्षेषु भवति लतासु वा ? ........................
(ग) कस्य शिरसि आम्रफलम् अपतत् ? ........................
(घ) द्वे मित्रे कुत्र गच्छत: स्म ? .......................

(ङ) ईश्वर: कीदृशं कार्यं करोति ? ........................
(च) निखिल: अविचार्यं कस्य निन्दाम् अकरोत् ? ......................

**2.पूर्णवाक्येन उत्तरत |** (पूरे वाक्य में उत्तर दीजिए | Answer in a complete sentence.)

(क) कालिन्दानां कूष्माण्डानां च लता: कीदृश्य: आसन् ? .................................
(ख) आम्रफलं कदा अपतत् ? .................................
(ग) निखिल: पीडया किम् अवदत् ? ................................
(घ) निखिलं क: अपराधबोध: अभवत् ? ................................
(ङ) यदि तस्य शिरसि वृक्षात् कूष्माण्डं पतेत् तदा किम् भवेत् ? ...............................

**3.निम्नलिखितानि वाक्यानि शुद्धानि कुरुत |** (निम्नलिखित वाक्यों को शुद्ध कीजिए | Correct the sentences and rewrite them.)

**उदाहरणम्** – तत्र **द्वौ मित्रौ** आस्ताम् | तत्र **द्वे मित्रे** आस्ताम् |

(क) सा लता **दुर्बलम्** अस्ति | ..............................
(ख) तस्य शिरसि **मधुर: आम्रफल:** अपतत् | .............................
(ग) इश्वरस्य रचना **त्रुटिपूर्ण**: अस्ति | .............................
(घ) अहं **मूर्खं** नास्मि | ..............................

**4.प्रश्ननिर्माणं कुरुत |** (प्रश्न-निर्माण कीजिए | Frame questions.)

(क) स: **सूर्यातपेन** पीडित: आसीत् |
(ख) **ईश्वरस्य** रचना दोषरहिता अस्ति |
(ग) **शिरसि** व्रजपात: अभवत् |
(घ) **लता:** क्षीणा: दुर्बला: च सन्ति |
(ङ) द्वे मित्रे **नगरम्** गच्छत: स्म |

**5.कथानक-क्रमेण पुनर्लिखत |** (दिए गए वाक्यों को कथा के क्रमानुसार पुन: लिखिए | Rewrite the sentences in the proper sequence.)

(क) सूर्यातापेन पीडित: स: मित्रमवदत् |
(ख) द्वे मित्रे नगरं प्रति गच्छत: स्म |
(ग) नूनम् अहं मूर्ख: निर्बुद्धि च अस्मि |
(घ) इश्वरस्य इयं रचना दोषमयुक्ता अस्ति |
(ङ) यावत् स: वृक्षस्य अध: अगच्छत् |
(च) सत्यमिदं यत् ईश्वरस्य रचना निर्दोषा अस्ति |

## भाषा-अवबोधनम्

**1.अधोलिखितवाक्यानि लङ्लकारे लिखत |** (दिए गए वाक्यों को लङ् लकार में लिखिए | Write the following sentences into past tense.)

**उदाहरणम्** – स: शिरसा: खल्वाट: अस्ति | **स: शिरसा खल्वाट: आसीत्** |

(क) त्वं इदं क्षेत्रं पश्य | .....................................

(ख) अहं इश्वरस्य रचनां पश्यामि | .....................................

(ग) इश्वर: यत्करोति शोभनं करोति | .....................................

(घ) मित्र ! वृक्षस्य अध: विश्रामं कुर्याव | .....................................

(ङ) एता: लता: क्षीणा: दुर्बला: च सन्ति | .....................................

**2.उदाहरणानुसारेण अव्ययपदै: द्वे द्वे वाक्ये लिखत |** (उदाहरणानुसार अव्यय पदों से दो-दो वाक्य लिखिए | Frame two sentences using the words as directed.)

(क) यावत्-तावत् : **यावत्** त्वं परिश्रमं न करिष्यसि **तावत्** सुपरिणामं न प्राप्स्यसि |

.........................................................................................

(ख) यदा-तदा : .........................................................................................

: .........................................................................................

(ग) यथा-तथा : .........................................................................................

: .........................................................................................

**3.समुचितमेलनं कुरुत |** (उचित मिलान कीजिए | Match the following.)

| | |
|---|---|
| (क) दोषहीना | (i) फलानि |
| (ख) खल्वाट: | (ii) लता: |
| (ग) क्षीणा: | (iii) रचना |
| (घ) सूक्ष्माणि | (iv) शिर: |

**4.पदपरिचयं कुरुत |** (पद-परिचय कीजिए | Parse the words.)

| शब्द: | मूलशब्द: | लिङ्गम् | विभक्ति: | वचनम् |
|---|---|---|---|---|
| (क) रचनायाम् - | .......... | ........... | ........... | ........... |
| (ख) आतपेन - | .......... | ........... | ........... | ........... |
| (ग) पीडया - | .......... | ........... | ........... | ........... |
| (घ) मुखात् - | .......... | ........... | ........... | ........... |

**5.अधोलिखितानि वाक्यानि एकवचने परिवर्तयत |** (निम्नलिखित वाक्यों को एकवचन में बदलिए | Change the following sentences in singular number.)

(क) सर्वा: रचना: दोषरहिता: सन्ति | ..................................................

(ख) अवां वृक्षस्य अध: विश्रामं कुर्याव | ..................................................

(ग) एता: लता: क्षीणा: दुर्बला: च सन्ति |        ..................................................
(घ) इश्वर: स्थूलानि फलानि अस्मासु लतासु उत्पादयति |  ........................................

**मूल्यपरकम्**

1.किं परेषां दोषाणाम् अन्वेषणम् उचितम् ? (क्या दूसरों के दोषों की खाज करना उचित है ?)

2.किं त्वं गुरो: आज्ञां पालयसि ? (क्या तुम गुरु की आज्ञा का पालन करते हो ?)

3.किं त्वं परेषाम् आलोचनां करोषि ? (क्या तुम दूसरों की आलोचना करते हो ?)



# उत्तराणि |

## सम्प्रति लेखनीयम्

**1.मञ्जूषाया: एकपदेन उत्तरत |** (मंजूषा से चुनकर एक पद में उत्तर दीजिए | Answer in one word using the words from the boxes.)

(क) गौरव:
(ख) लतासु
(ग) निखिलस्य
(घ) नगरं प्रति
(ङ) शोभनम्
(च) ईश्वरस्य

**2.पूर्णवाक्येन उत्तरत |** (पूरे वाक्य में उत्तर दीजिए | Answer in a complete sentence.)

(क) कालिन्दानां कूष्माण्डानां च लता: क्षीणा: दुर्बला: च आसन् |
(ख) यावत् निखिल: वृक्षस्य अध: अगच्छत् तदा आम्रफलं अपतत् |
(ग) निखिल: पीडया अवदत् –हा शिरसि व्रजपातो अभवत् |
(घ) निखिल: अपराधबोध: अभवत् यत् ईश्वरस्य सर्व रचना दोषहीना अस्ति |
(ङ) यदि तस्य शिरसि वृक्षात् कूष्माण्ड पतेत् तदा तस्य शिर: खण्डश: भवेत् |

**3.निम्नलिखितानि वाक्यानि शुद्धानि कुरुत |** (निम्नलिखित वाक्यों को शुद्ध कीजिए | Correct the sentences and rewrite them.)

(क) सा लता दुर्बला अस्ति |
(ख) तस्य शिरसि मधुरम् आम्रफलम् अपतत् |
(ग) ईश्वरस्य रचना त्रुटिपूर्णा अस्ति |
(घ) अहं मूर्ख: नास्मि |

**4.प्रश्ननिर्माणं कुरुत |** (प्रश्न-निर्माण कीजिए | Frame questions.)
(क) स: केन पीडित: आसीत् ?
(ख) कस्य रचना दोषरहिता अस्ति ?
(ग) कुत्र व्रजपात: अभवत् ?
(घ) का: क्षीणा: दुर्बला: च सन्ति ?
(ङ) द्वे मित्रे कम प्रति गच्छत: स्म ?

**5.कथानक-क्रमेण पुनर्लिखत |** (दिए गए वाक्यों को कथा के क्रमानुसार पुन: लिखिए | Rewrite the sentences in the proper sequence.)

(क) द्वे मित्रे नगरं प्रति गच्छत: स्म |
(ख) इश्वरस्य इयं रचना दोषमुक्ता अस्ति |
(ग) सूर्यातापेन पीडित: स: मित्रमवदत् |
(घ) यावत् स: वृक्षस्य अध: अगच्छत् |
(ङ) नूनम् अहं मूर्ख: निर्बुद्धि च अस्मि |
(च) सत्यमिदं यत् ईश्वरस्य रचना निर्दोषा अस्ति |

## भाषा-अवबोधनम्

**1.अधोलिखितवाक्यानि लङ्लकारे लिखत |** (दिए गए वाक्यों को लङ् लकार में लिखिए | Write the following sentences into past tense.)

(क) त्वं इदं क्षेत्रं अपश्य: |
(ख) अहं ईश्वरस्य रचनां अपश्यम् |
(ग) ईश्वर: यत् अकरोत शोभनं अकरोत् |
(घ) मित्र ! वृक्षस्य अध: विश्रामं अकुर्व |
(ङ) एता: लता: क्षीणा: दुर्बला: च आसन् |

**2.उदाहरणानुसारेण अव्ययपदै: द्वे द्वे वाक्ये लिखत |** (उदाहरणानुसार अव्यय पदों से दो-दो वाक्य लिखिए | Frame two sentences using the words as directed.)

(क) यावत्-तावत् : यावत् कर्मं न करिष्यसि तावत् सफल: न भविष्यसि |
: यावत् स: पठति तावत् अहं क्रीडामि ।
(ख) यदा-तदा : यदा अहं पठामि तदा त्वं पठसि |
: यदा स: आगमिष्यति तदा वयम् चलिष्याम: |
(ग) यथा-तथा : यथा राजा तथा प्रजा |
: यथा परिश्रमम् तथा फलम् |

**3.समुचितमेलनं कुरुत |** (उचित मिलान कीजिए | Match the following.)

(क) दोषहीना (i) रचना
(ख) खल्वाट: (ii) शिर:

(ग) क्षीणा: (iii) लता:
(घ) सूक्ष्माणि (iv) फलानि

**4.पदपरिचयं कुरुत |** (पद-परिचय कीजिए | Parse the words.)

| शब्द: | मूलशब्द: | लिङ्गम् | विभक्ति: | वचनम् |
|---|---|---|---|---|
| (क) रचनायाम् - | रचना | स्त्रीलिंग | सप्तमी | एकवचनम् |
| (ख) आतपेन - | आतप | पुल्लिंग | तृतीया | एकवचनम् |
| (ग) पीडया - | पीडा | स्त्रीलिंग | तृतीया | एकवचनम् |
| (घ) मुखात् - | मुख | नपुंसकलिंग | पञ्चमी | एकवचनम् |

**5.अधोलिखितानि वाक्यानि एकवचने परिवर्तयत |** (निम्नलिखित वाक्यों को एकवचन में बदलिए | Change the following sentences in singular number.)

(क) सर्वा रचना दोषरहिता अस्ति |
(ख) अहं वृक्षं अध: विश्रामं कुर्याम् |
(ग) एषा लता क्षीणा दुर्बला च अस्ति |
(घ) ईश्वर: स्थूलम् फलम् अस्याम् लतायाम् उत्पादयति |

## मूल्यपरकम्

1.परेषां दोषाणां अन्वेषणम् उचितं नास्ति ।

2.आम्, अहं गुरो: आज्ञां पालयामि ।

3.न, अहं परेषां आलोचनां न करोमि ।



धन्यवादः ।

********

